2010

A-I/2/2311/ 21

द्वितीयसत्रार्द्धम्

द्वितीयपत्रम्

नव्यन्यायः

समयः घण्टात्रयम् पूर्णाङ्काः 80

अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः। (15×2=30)

1. वह्निप्रकारकस्य आहार्यज्ञानस्य आकारः कः?
2. व्यभिचारघटितबाधस्योदाहरणं किम्?
3. 'विशेषगुणाभाववान् द्वितीयक्षणावच्छिन्नघटो गुणसामान्याभाववान्' इत्यत्र बाधदोषः कः?
4. लक्षणे विशिष्टान्तराघटितत्वविशेषणं किमर्थम्?
5. स्ववृत्तियावद्धेत्वाभासविभाजकरूपेण साजात्यनिवेशे को दोषः?
6. को नाम व्यभिचारः? स च कुत्र स्थले? उदाहरत।
7. हेतोः दोषवत्त्वं केन सम्बन्धेन?
8. प्रतिबन्धकताघटितलक्षणे विशेष्यतायां प्रकृतपक्षतावच्छेदकावच्छिन्नत्वं किमर्थम्?
9. पक्षनिष्ठः पक्षतावच्छेदकविरहः को दोषः?
10. साध्याप्रसिद्धिदोषः कः? कुत्र?
11. सत्प्रतिपक्षनिश्चयस्य अनुमितिं प्रति कया मुद्रया प्रतिबन्धकत्वम्?

**अथवा**

'पर्वतो वह्निमान् वह्निव्यभिचारिणः' इत्यत्र दोषलक्षणे अनुमित्यप्रसिद्धिः कुतः?

12. अत्र वदन्तिकल्पे अनुमितिसामान्ये इत्यत्र सामान्यपदं किमर्थम्?

**अथवा**

तत्र निश्चयपदं कीदृशनिश्चयपरम्?

13. अनुपसंहारित्वनिश्चयः कीदृशव्याप्त्यवगाहिज्ञानं प्रति प्रतिबन्धकः?

**अथवा**

को नाम अनुपसंहारित्वदोषः?

14. "पक्षतावच्छेदकवैशिष्ट्यादिकं च वैज्ञानिकम्" इत्यत्र वैज्ञानिकत्वं किं रूपम्?

**अथवा**

ह्रदो वह्निमान् जलात् इत्यत्र बाधव्यभिचारदोषौ कौ?

15. अन्वयव्याप्तिग्रहविरोधी व्यभिचारदोषः कः?

**अथवा**

अत्र वदन्तिकल्पे विरोधिविषयिताप्रयुक्तत्वं कुत्र किमर्थञ्च, निवेशितम्?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** (5×6=30)

16. विशेषगुणवद्द्वितीयक्षणावच्छिन्नघटे आश्रयासिद्धौ प्रतिबन्धकताघटितलक्षणस्य अव्याप्तिं प्रदर्शयत।

17. "साध्याभाववद्वृत्तिसाधनं, साधनवद्वृत्तिसाध्याभावो वा हेतुदोषः" इति दीधितिग्रन्थस्य भावं स्पष्टयत।

18. अत्र वदन्ति कल्पे अनुमितिसामान्यनिवेशनस्य प्रयोजनं स्पष्टयत।

**अथवा**

"पक्षतावच्छेदकवैशिष्ट्यादिकं च वैज्ञानिकं, न तु वास्तवं ग्राह्यम्' इत्यस्याशयं स्पष्टयत।

19. 'एकमात्रदोषस्थले तत्त्वमेव हेत्वाभासत्वम्' इति यथाग्रन्थं निरूपयत।

**अथवा**

केचित् मताभिप्रेतलक्षणस्य 'निर्वह्निः पर्वतो वह्निमान्' इत्यत्र दोषे समन्वयं प्रदर्शयत।

20. अत्र वदन्ति कल्पे उभयविधव्याप्तिनिवेशस्य किं प्रयोजनम्? स्पष्टयत।

**अथवा**

अनाहार्यमानसज्ञाननिवेशकल्पान्तरानुसरणे बीजं प्रदर्शयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** (1×20=20)

21. प्रतिबन्धकताघटितलक्षणस्य वह्निमत्पर्वतात्मके आश्रयासिद्धिदोषे अव्याप्तिमाशङ्क्य,अत्र वदन्ति कल्पानुसारेण तत्परिहरत।

**अथवा**

"व्याप्तिश्चान्वयतो व्यतिरेकतश्च ग्राह्या" इति दीधितिग्रन्थं सावतरणं व्याख्यात।

**अथवा**

'तादृशपक्षे' इत्यारभ्य इत्यपि केचिदित्यन्तेन दीधितौ प्रदर्शितं केचिन्मतं सावतरणं व्याख्यात।